अङ्क-२४
जुलाई-दिसम्बर २०१४

**वेदविद्या**
ISSN-2230-8962

# वैदिकविचाराणाम् आधुनिकपरिप्रेक्ष्ये प्रासङ्गिकता

**नरेन्द्रकुमारः**

**'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'**- कथनस्याभिप्रायोऽयं वर्तते यत् संस्कृतभाषा भारतीयसमाजस्य आधारः । इयं भाषा विश्वस्य श्रेष्ठतमा भाषा इति । अस्याः भाषायाः सुविशालं वैदिकं लौकिकञ्च साहित्यं विलोक्य सर्वे विस्मिताः भवन्ति । चत्वारो वेदाः, ब्राह्मणसाहित्यं, आरण्यकानि, उपनिषदः, दर्शनानि, वेदाङ्गानि, रामायणं, महाभारतं तथा च महाकविभास-कालिदास-भारवि-श्रीहर्ष-माघ-भवभूति-बाणभट्ट-सुबन्धुप्रभृतिभिः स्वनामधन्यैः महाकविभिः विरचितानि महनीयानि, रमणीयानि, नाटक-महाकाव्य-चम्पूकाव्य-गीतिकाव्यादीनि पठित्वा कस्य सचेतसः हर्षातिरेको न जायते ? यद्यपि भाषेयं भारतदेशस्य अलङ्कारभूता; परन्तु अस्यां भाषायां येषां विचाराणां चिन्तनानां वा समावेशोऽस्ति न तादृशः अन्यत्र दृश्यते ।

ऋग्वेदे कथितमस्ति -

**सं ग॑च्छध्व॒ं सं व॑दध्वं सं वो॒ मनां॑सि जानताम् ।**
**दे॒वा भा॒गं यथा॒ पूर्वे॑ संजाना॒ना उ॒पास॑ते ॥**[१]
**स॒मा॒नो मन्त्रः॒ समि॑तिः समा॒नी स॑मा॒नं मनः॑ स॒ह चि॒त्तमे॑षाम् ।**
**स॒मा॒नं मन्त्र॑म॒भि म॑न्त्रये वः समा॒नेन॑ वो ह॒विषा॑ जुहोमि ॥**[२]

अर्थात् समानं गमनं, समानं वचनं, समानं मनः, समानो मन्त्रः, समानं चित्तमपि स्यादिति उद्घोषितं वैदिकऋषिणा । अतः अस्माभिः सर्वैः सह समानव्यवहारः व्यवहर्तव्यः, तथा समानं प्रयोजनं, समानं हृदयं च भूयात् समेषाम् इति वैदिकपरम्परायाः चिन्तनम् ।[३]

वैदिकसाहित्यस्य गुणकीर्त्तनं गौरवाय प्रकल्प्यते । वेदस्य ज्ञानं भारतस्याभिमानवर्धकम् इत्यत्र सन्देहो नास्ति । ऋग्वेदस्य दशममण्डलस्य चतुस्त्रिंशत्तमे सूक्ते अक्षक्रीडां परित्यज्य कृषिं कर्तुं मानवः प्रबोध्यते।[४] इदं जीवनमूल्यमद्यत्वे स्वीयां प्रासङ्गिकतां सविशेषं प्रतिपादयति यदा सहस्रो हि जना

---

[१] ऋग्वेद, १०.१९१.२
[२] तदेव, १०.१९१.३
[३] स॒मा॒नी व॒ आकू॑तिः समा॒ना हृद॑यानि वः ।
स॒मा॒नम॑स्तु वो॒ मनो॒ यथा॑ वः॒ सु॒सहास॑ति । ऋग्वेद १०.१९१.४
[४] अ॒क्षैर्मा दी॑व्यः कृ॒षिमित्कृ॑षस्व वि॒त्ते र॑मस्व ब॒हु मन्य॑मानः ।
तत्र॒ गावः॑ कितव॒ तत्र॑ जा॒या तन्मे॒ वि च॑ष्टे सवि॒तायम॒र्यः । ऋग्वेद, १०.३४.१३

'लाटरी' - प्रभृतिषु द्यूतभेदेषु स्वधनं नाशयन्ति परिवारं च दुःखीकुर्वन्ति । **'अक्षैर्मा दीव्यः'** - इत्यस्य वैदिकविचारस्यानुपालनं साम्प्रतिकसमाजाय शिक्षयति । एकस्मिन् स्थाने ऋग्वेदे प्राप्यते - **भद्रं मनः कृणुष्व वृत्रतूर्ये।**[१] अतः मनः यदि स्वच्छं निर्मलं च स्यात् तर्हि मनोविकाराः मानवं प्रभावयितुं न समर्थाः भवन्ति । वस्तुतः उत्तममनोयुक्ताः मानवाः सततमेव प्रगतिमाप्नुवन्तीति।[२] एवं स्वस्थशरीरनिर्माणाय स्वस्थमनसः आवश्यकता वर्तते । अधुना मानसिकरोगाः सर्वत्र परिलक्ष्यन्ते । समाजे मनोरोगिणां सङ्ख्या उत्तरोत्तरं वर्धमाना दृश्यते । इयं महती समस्या अस्माकं सर्वेषां पुरतः दृश्यमाना अस्ति । एतस्याः समस्यायाः एकमात्रोपायः केवलं वेदेष्वेव निहितोऽस्ति ।

वयं सर्वेऽपि मानवाः इतरैः सह जीवामः, कार्यं कुर्मश्च । अतः सुविचाराणाम् अस्माकं जीवने महती आवश्यकता । वेदेषु अनेकानि एतादृशानि विचाराणि सन्ति, येषां पालनेन समाजस्य कल्याणं सम्भवति एव । वेदा न केवलं ज्ञानविज्ञानराशयोऽपि तु समाजस्य अनुशासका धर्मग्रन्थाः वर्तन्ते । तेषां सन्देशः शाश्वतो, न तु युगविशेषानुरोधि ।वेदा मानवसंस्कृतेः सभ्यतायाश्चादिस्रोतः । अत्र मनुष्याणां निरामयताविषयकं स्वास्थ्यविषयकञ्च महच्चिन्तनं प्रत्यक्षीभवति । वेदे कथितमस्ति यत् भद्रस्याकाङ्क्षीपुरुषः न केवलं मानवं प्रति अपितु इतरप्राणिनं प्रत्यपि शुभदृष्टिं निक्षिपेत् ।[३] इयं भावना विद्यते वेदेषु । धर्मार्थकाममोक्षस्य चतुर्विधपुरुषार्थसाधनेनैव जीवनलक्ष्यं पूर्णं भवति । एतत् पुरुषार्थसाधनाय वैदिकसाहित्यमनवरतमुपयुज्यते । सङ्क्षेपेण विश्वकल्याणाय विश्वप्रेमपरिवर्धनं, कर्त्तव्यनिर्वहणस्त्रीणामादरं, न्यायमार्गेण धनोपार्जनम्, उदारता, दया, सत्यभाषणं, मधुरभाषणं, सत्सङ्गमः, सुपथगमनं, पवित्रता, सदाचरणमित्याद्यंशा सर्वदोपयुक्ताः भवन्तीति एतादृशानि बीजानि वेदेष्वनेकत्रोपलभ्यन्ते । अतः मानवतां स्थापयितुं वेदेषु अनेकाः उपदेशाः विद्यन्ते ।

वैदिकऋषयः विश्वस्य शान्तिकामनया उच्चारितवन्तः - **द्यौः शान्तिरन्तरिक्षं शान्तिः, पृथिवी शान्तिः, आपः शान्तिः, ओषधयः शान्तिः, वनस्पतयः शान्तिः, विश्वेदेवाः शान्तिः, ब्रह्म शान्तिः, सर्वं शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि ॥**[४]

एतस्य विचारस्य यथार्थता सम्प्रति अस्ति न वा ? इति विचारयामः चेत् अस्माकं नगरीषु यन्त्रोत्पादननिर्गतैर्धूमैः वायुर्दूषितः, जलं दूषितम् । अरण्यानाम् उच्छेदनात् वृष्टिर्न भवति । मृत्तिकायाः द्रुतमवक्षयो जायते । अस्मिन् संसारे जीवनसंरक्षायै एव जडचेतनाः जीवाः जलमभिलषन्ति । जलं विना तेषां जीवनं सुरक्षितं न तिष्ठति । अतः वेदे प्रार्थ्यते - **शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं**

[१] ऋग्वेद, ८.१९.२०
[२] तदेव, ५.१.२
[३] भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।
भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ॥ वही. १०.१६४.२
[४] यजुर्वेद, ३६.१७

**योरभिस्रवन्तु नः।**[1] अस्यां स्थित्याम् अन्तरिक्षं शान्तिः, पृथिवी शान्तिः, वनस्पतयः शान्तिः इति अस्माकमतीवाश्यकम्।

विश्वेऽस्मिन् सर्वत्र अशान्तेः वातावरणं दृश्यते । सर्वत्रैव शान्तिसम्मेलनं, शान्तिवार्ता, शान्तिसङ्घस्य निर्माणं, शान्तिनिकेतनं, शान्त्यर्थमुपासना चेत्यादि श्रूयते, पठ्यते च । अस्माकं सर्वेषाम् इदं परं प्रयोजनमस्ति यत् केन उपायेन भूमण्डले शान्तिः संस्थापिता स्यात् । देशे विदेशे च सर्वत्र मानवमात्रेषु अवहेलना तेषां शोषणं च, गुरुजनेषु अवमानना, हिंसा, अनाचारः, अर्थस्य लोलुपता, परद्रव्यापहरणं, परस्त्री-अपहरणं, देशिकसीमा-उल्लङ्घनं, प्रवञ्चकता, शठता, अविश्वासादिकं यावन्तः दुर्गुणाः दृश्यन्ते । गायत्रीमन्त्रे सर्वेषां बुद्धिप्रेरणार्थं प्रार्थना कृतास्ति- **धियो यो नः प्रचोदयात् ।**[2]

वेदे राष्ट्रपरिकल्पनायाः राष्ट्ररक्षायाः राष्ट्राभ्युदयोपायस्य राष्ट्रियसंवर्धनादिसम्बन्धित-विभिन्नसन्दर्भाणाञ्च विस्तृता चर्चा मिलति । राष्ट्रस्य समग्रसमृद्ध्यर्थं कामना एवमभिव्यक्ता ।

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतां मा राष्ट्रे राजन्यः ।**
**शूर इषव्योऽतिव्याधी महारथो जायताम् ॥**
**दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा**
**जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् ।**
**निकामे निकामे नः पर्जन्यो वर्षतु ।**
**फलवत्यो न ओषधयः पच्यन्ताम् ।**
**योगक्षेमो नः कल्पताम् ।**[3]

एवं विश्वकल्याणाय लोकोपकारकोऽयं मन्त्रः समाजस्य विकासाय आधारभूतं तत्त्वं भवति ।

शिक्षा, यथा समाजस्य शिक्षाव्यवस्था भवति, तथैव समाजः । पुरा यद्यपि शिक्षाया उद्देश्यमासीत् **'सा विद्या या विमुक्तये'** तथापि पुरुषार्थचतुष्टयमध्ये धर्मार्थकाममोक्षाः परिगणिता आसन् । येन **'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"** अर्थात् वेदादिशास्त्राध्यनेन सांसारिकसमृद्धिं प्राप्य नियमेन जीवनमुक्तिं प्राप्स्यति, तथा व्यवस्थासीत् । अतः शिक्षायाः प्रभावः न केवलमस्मिन् जन्मनि, अपि तु परलोकेऽपि आसीत् । शिक्षा मानवजीवनं सरलीकरोति, परन्तु इदानीं भौतिकीसमृद्धिः एव स्वीकुर्वन्ति। येन कारणेन हिंसा, अनाचारः, शठतादीनां दुर्गुणानामेव विकासो जायते । अतः वर्तमानशिक्षाव्यवस्थायामावश्यकपरिवर्तनं भवेत् इति अस्माभिः प्रयासः करणीयः ।

आदर्शपरिवारः कथं भविष्यति ? तत्सन्दर्भे अथर्ववेदः कथयति यत्-

---

[1] शुक्लयजुर्वेद, ३६.१२
[2] ऋग्वेद, ३.६२.१०
[3] वाजसनेयिसंहिता, २२.२२

**ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः ।**
**अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि ।**[1]

अर्थात् वृद्धजनयुक्ता कुटुम्बसभ्याः एकचित्ताः भूत्वा कार्यं कुर्वन्तु, तेषां मध्ये मा द्वेषघटकाः भवेयुः। अन्योऽन्यस्मै मधुरां वाचं वदतु । अनेन कुटुम्बस्य सर्वसभ्याः भौतिकसम्पतौ एवं च आत्मोन्नत्यै रताः भवेयुः । एतादृशाः कुटुम्बसभ्याः परस्परं प्रेमभावेन शतं शरदः सुमनयेन जीविताः भवन्ति, भविष्यन्ति च ।

पतिपत्न्योर्मध्ये प्रेममयव्यवहारस्य विषयेऽपि अथर्ववेदे कथितमस्ति यत् पतिः एवं च पत्नी मधुरवाचा परस्परहृदि निवसतः । यद्यपि बाह्यरूपे तयोः तनू भिन्नौ किन्तु मनसा समहृदयौ स्तः।[2] वैदिकसूक्तं मनुष्यात् परम् अन्यान् जीवानपि आदरेण सम्बोधयति यथा-

**दृते दृ थ्ं हं मा मित्रस्यं मा चक्षुषा**
**सर्वाणि भूतानि समीक्षन्ताम् ।**
**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥**[3]

समस्तप्राणिभिः सह मनुष्यः पृथिव्यां निवसति । अधुना राष्ट्रे वन्यजन्तुसप्ताहः पालितो भवति । परन्तु यदा भारतभूमौ वैदिकसभ्यतायाः उन्मेषोऽभवत् तदा वैदिकऋषिः सर्वप्राणिभिः सह मनुष्यस्य मित्ररूपेण अवस्थानं कर्त्तव्यमिति निगदितवान् ।

**उपसंहारः**

वेदाः एव भारतीयानाम् आचारसंहितामूलम् । वेदानां तेजस्वीविचारधारया एव भारतीयासंस्कृतिः दृढा भवति, अद्यापि च स्थिररूपेण प्रवहति । कालप्रवाहोऽपि वेदविचारफलप्राप्तेः अवरोधाय न समर्थः। अद्य सर्वत्र अशान्तेः साम्राज्यमस्ति, अभद्रमेव प्रायः शृणुमः पश्यामश्च, लोकाः कर्म अकृत्वा विश्रान्तिं विलासं प्रमोदं च इच्छन्ति, तथा च परस्परं विवदमानाः जनाः समाजस्याहितं साधयन्ति । भूमण्डले प्रदूषणवर्धने रतोऽस्ति मानवः; राष्ट्रियं लोकस्य च हितं विस्मृत्य वैयक्तिकं स्वार्थम् इच्छन्ति । अतः एतेषां समस्यानां निराकरणार्थं वेदेषु एव विविधाः विचाराः प्रकटिताः । अतः वयं सर्वदा श्रवणाभ्यां भद्रमेव शृणुयाम, नेत्राभ्यां च भद्रमेव पश्येम इति ।[4]

---

[1] अथर्ववेद, ३.३०.५
[2] अक्ष्यौऽ नौ मधुसंकाशे अनीकं नौ समञ्जनम् ।
अन्तः कृष्णुष्व मां हृदि मन इन्नौ सहासति ॥ अथर्ववेद, ७.३६.१
[3] यजुर्वेद, ३६.१
[4] भद्रं कर्णेभिः शृणुयाम देवा ।
भद्रं पश्येमाक्षभिर्यजत्राः॥ यजुर्वेद, २५.२१

अतः उक्तानां विचारणाम् आचरणेनैव हिंसा, अनाचारः, भ्रष्टाचारः, अर्थस्य लोलुपता, परद्रव्यापहरणम् इत्यादयः दुर्गुणाः विनष्टा भविष्यन्ति ।

वैदिकविचाराणाम् एतादृशं सहजगुणगौरवञ्चावलोक्यैव वयमिदं वक्तुं शक्नुमः यत् एतेषां विचाराणाम् आधुनिकपरिप्रेक्ष्ये प्रासङ्गिकता अस्ति भविष्यति च । अतः **सर्वा आशा मम मित्रं भवन्तु** [1]इति।

अन्ते च-

**ओ३म् स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव।**
**पुनर्ददताघ्नता जानता सं गमेमहि ॥**[2]

**नरेन्द्रकुमारः**
शोधछात्र- वी.वी.बी.आई.एस.एण्ड आई.एस.
पञ्जाब विश्वविद्यालयः, होशियारपुरम्

[1] अथर्ववेद, १९.१५.६
[2] ऋग्वेद, ५.५१.१५